श्री लक्ष्मीनारायणाष्टकं

श्री लक्ष्मीनारायणाष्टकं

आर्तानां दुःखशमने दीक्षितं प्रभुमव्ययं |
अशेषजगदाधारं लक्ष्मीनारायणं भजे || 1 ||

अपारकरुणांभोधिं आपद्बांधवमच्युतं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 2 ||

भक्तानां वत्सलं भक्तिगम्यं सर्वगुणाकरं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 3 ||

सुहृदं सर्वभूतानां सर्वलक्षणसंयुतं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 4 ||

चिदचित्सर्वजंतूनां आधारं वरदं परं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 5 ||

शंखचक्रधरं देवं लोकनाथं दयानिधिं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 6 ||

पीतांबरधरं विष्णुं विलसत्सूत्रशोभितं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 7 ||

हस्तेन दक्षिणेनाजं अभयप्रदमक्षरं |
अशेषदुःखशांत्यर्थं लक्ष्मीनारायणं भजे || 8 ||

यः पठेत् प्रातरुत्थाय लक्ष्मीनारायणाष्टकं |
विमुक्तः सर्वपापेभ्यः विष्णुलोकं स गच्छति || 9 ||

इति श्री लक्ष्मीनारायणाष्टकं |